श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ एकषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ एकषष्टितमः सर्गः ॥

मधुवनं गत्वा तत्रत्यानां मधूनां फलानां च वानरैर्यथेष्टमुपभोगो वनरक्षकस्य भुवि विकर्षणं च

ततो जाम्बवतो वाक्यमगृह्णन्त वनौकसः।
अङ्गदप्रमुखा वीरा हनूमांश्च महाकपिः॥ **5.61.1** ॥

प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरः सराः।
महेन्द्राग्रात् समुत्पत्य पुप्लुवुः प्लवगर्षभाः॥ **5.61.2** ॥

मेरुमन्दरसङ्काशा मत्ता इव महागजाः।
छादयन्त इवाकाशं महाकाया महाबलाः॥ **5.61.3** ॥

सभाज्यमानं भूतैस्तमात्मवन्तं महाबलम्।
हनूमन्तं महावेगं वहन्त इव दृष्टिभिः॥ **5.61.4** ॥

राघवे चार्थनिर्वृत्तिं कर्तुं च परमं यशः।
समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः॥ **5.61.5** ॥

प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनन्दिनः।
सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः॥ **5.61.6** ॥

प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः।
नन्दनोपममासेदुर्वनं द्रुमशतायुतम्॥ **5.61.7** ॥

यत् तन्मधुवनं नाम सुग्रीवस्याभिरक्षितम्।
अधृष्यं सर्वभूतानां सर्वभूतमनोहरम्॥ **5.61.8** ॥

यद् रक्षति महावीरः सदा दधिमुखः कपिः।
मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः॥ **5.61.9** ॥

ते तद् वनमुपागम्य बभूवुः परमोत्कटाः।
वानरा वानरेन्द्रस्य मनः कान्तं महावनम्॥ **5.61.10** ॥

ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत्।
कुमारमभ्ययाचन्त मधूनि मधुपिङ्गलाः॥ **5.61.11** ॥

ततः कुमारस्तान् वृद्धाञ्जाम्बवत्प्रमुखान् कपीन्।
अनुमान्य ददौ तेषां निसर्गं मधुभक्षणे॥ **5.61.12** ॥

ते निसृष्टाः कुमारेण धीमता वालिसूनुना।
हरयः समपद्यन्त द्रुमान् मधुकराकुलान्॥ **5.61.13** ॥

भक्षयन्तः सुगन्धीनि मूलानि च फलानि च।
जग्मुः प्रहर्षं ते सर्वे बभूवुश्च मदोत्कटाः॥ **5.61.14** ॥

ततश्चानुमताः सर्वे सुसंहृष्टा वनौकसः।
मुदिताश्च ततस्ते च प्रनृत्यन्ति ततस्ततः॥ **5.61.15** ॥

गायन्ति केचित् प्रहसन्ति केचि -
    न्नृत्यन्ति केचित् प्रणमन्ति केचित्।
पतन्ति केचित् प्रचरन्ति केचित्
    प्लवन्ति केचित् प्रलपन्ति केचित्॥ **5.61.16** ॥

परस्परं केचिदुपाश्रयन्ति
    परस्परं केचिदतिब्रुवन्ति।
द्रुमाद् द्रुमं केचिदभिद्रवन्ति
    क्षितौ नगाग्रान्निपतन्ति केचित्॥ **5.61.17** ॥

महीतलात् केचिदुदीर्णवेगा
    महाद्रुमाग्राण्यभिसम्पतन्ति।
गायन्तमन्यः प्रहसन्नुपैति
    हसन्तमन्यः प्ररुदन्नुपैति॥ **5.61.18**॥

तुदन्तमन्यः प्रणदन्नुपैति
    समाकुलं तत् कपिसैन्यमासीत्।
न चात्र कश्चिन्न बभूव मत्तो
    न चात्र कश्चिन्न बभूव दृप्तः॥ **5.61.19**॥

ततो वनं तत् परिभक्ष्यमाणं
    द्रुमांश्च विध्वंसितपत्रपुष्पान्।
समीक्ष्य कोपाद् दधिवक्त्रनामा
    निवारयामास कपिः कपींस्तान्॥ **5.61.20**॥

स तैः प्रवृद्धैः परिभर्त्स्यमानो
    वनस्य गोप्ता हरिवृद्धवीरः।
चकार भूयो मतिमुग्रतेजा
    वनस्य रक्षां प्रति वानरेभ्यः॥ **5.61.21**॥

उवाच कांश्चित् परुषाण्यभीत -
    मसक्तमन्यांश्च तलैर्जघान।
समेत्य कैश्चित् कलहं चकार
    तथैव साम्नोपजगाम कांश्चित्॥ **5.61.22**॥

स तैर्मदादप्रतिवार्यवेगै -
    र्बलाच्च तेन प्रतिवार्यमाणैः।
प्रधर्षणे त्यक्तभयैः समेत्य
    प्रकृष्यते चाप्यनवेक्ष्य दोषम्॥ **5.61.23**॥

**नखैस्तुदन्तो दशनैर्दशन्त -**
**स्तलैश्च पादैश्च समापयन्तः।**
**मदात् कपिं ते कपयः समन्ता -**
**न्महावनं निर्विषयं च चक्रुः॥ 5.61.24॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकषष्टितमः सर्गः॥